# पञ्चमः पाठः

# सञ्जय उवाच ।

## पाठप्रवेशः

पूर्वस्मिन् पाठे कालिदासमहाकवेः महाकाव्याद् उद्धृतान् कांश्चन श्लोकान् वयम् अपठाम खलु ? तत्र नवरसेषु को रसः वर्तते ? स्वयंवरस्य वर्णनया अत्र शृङ्गार एव मुख्यो रसः। अन्ये कति रसाः सन्ति ? तेषु रसेषु भवताम् इष्टतमः रसः कः ? तस्य कारणं किम् ?

## आमुखम्

संस्कृतसाहित्येभ्यः बहूनि काव्यरत्नानि स्वीकृत्य एव कैरलीसाहित्यं तस्य बाल्यदशायां समृद्धम् अभवत् । तथा कालिदासादीनां काव्येभ्यः बहवः केरलीयकवयः अनेकान् श्लोकान् यथासन्दर्भं स्वीकृतवन्तः । तेषु हास्यरसप्रधानान् अंशान् स्वीकृत्य समर्थया रीत्या प्रयुक्तवानस्ति सञ्जयः। सरसकवेः तोलस्य, महाकवेः कुञ्चन् नम्ब्यार् महाशयस्य च मार्गमवलम्ब्य संस्कृतसाहित्यस्यापि साहाय्येन सञ्जयः विविधाभिः हास्यरचनाभिः समाजिकविमर्शनम् अकरोत् । तस्य महात्मनः लघुजीवनचरितमेव अत्र पठामो वयम् ।

हास्यकणिका-1 हास्यकणिका-2




सञ्जय उवाच

"संस्कृतमहाकवयः हास्यचित्रणे प्रायेण विमुखाः भवन्ति इति केचिन्मन्यन्ते । अभिमतोऽयं पूर्णतया सत्यं न भवति । महाकविः कालिदासोऽपि बहुप्रकारेण हसितवान् इति वस्तुतां तस्य महाकाव्येभ्यो द्रष्टुं शक्यते । स्वकीयासु कृतिषु स महाकविः अतिसूक्ष्मतया प्रयोगचारुतया बहुत्र हास्यप्रयोगम् अकरोत् । बाह्यदर्शने प्रसन्नपूर्णेष्वपि तस्य काव्यप्रवाहेषु अतिगम्भीराः विकारगर्त्ताश्च सन्ति"।

"विकारशीलानां जीवितं दुःखभूयिष्ठं भवति। विचारशीलानां तु जीवितम् आनन्दपूर्णं च भवति" इति वदन् सञ्जयः साहित्यविचारेणैव जीवितं निनाय। पुत्रकलत्रयोः अकालमृत्युं, राजयक्ष्मणा तेन अनुभूयमानम् आत्मक्लेशञ्च नितरां विस्मृत्य हास्यरसप्रधानाभिः रचनाभिः सः अनुवाचकान् बहुप्रकारेण हासयति स्म । समाजे वर्तमानानि अनौचित्यानि निरीक्ष्य तानि स्वतूलिकया निशितरूपेण विमृश्य स्वयम् अहसच्च ।

संस्कृतम्, मलयालम्, आङ्गलेयम् इत्यादिषु भाषासु निष्णातः आसीदयं महात्मा । कञ्चित्कालं पालक्काट् विक्टोरिया कोलेज्, मलबार् क्रिस्त्यन् कोलेज् इत्येतयोः महाविद्यालययोः आङ्गलभाषाध्यापकवृत्तिं निनाय । तस्मिन् समये षेक्स्पियर् महाकवेः

ओथल्लो नाम नाटकस्य कैरलीविवर्तनं कृतवान् । भगवद्गीता, ज्योतिषम् इत्यादिषु अतीवतत्परोऽयं तेषां पठने निमग्नः सन् तेषु सविशेषज्ञानं सम्पादितवान् । "सञ्जयन्" इति तूलिकानाम स्वीकृत्य पश्चात् प्रसिद्धस्य तस्य यथार्थनाम माणिक्कोत्त् रामुण्णि नायर् (एम् आर् नायर्) इत्यस्ति। केरलपत्रिका, सञ्जयन्, विश्वरूपम् इत्येतासां पत्रिकाणां सम्पादकत्वेन सः प्रख्यातः अभवत् । हास्याञ्जलिः, आद्योपहारः, सञ्जयन् (६ भागाः), साहित्यनिकषः इत्येताः अस्य प्रधानकृतयः । कुञ्चन् नम्ब्यार् महाशयस्य अनन्तरं संस्कृतस्यापि साहाय्येन सर्वान् निरन्तरं सः हासयति स्म। त्रिचत्वारिंशदधिकैकोनविंशतिशततमे (१९४३) वर्षे स्वस्य चत्वारिंशे वयसि स हास्यप्रियः हास्यरसिकानां सर्वेषां नेत्राणि अश्रुभिः सम्पूर्य इतः निरगात्।



**सञ्जयन्**

| | | |
|---|---|---|
| नाम | - | एम् आर् नायर् (माणिक्कोत्त् रामुण्णि नायर्) |
| तूलिकानाम | - | सञ्जयन् |
| जन्म | - | १९०३ जूण् १३ |
| जन्मस्थलम् | - | तलश्शेरि |
| पितरौ | - | माटाविल् कुञ्ञिरामन् वैद्यर् , माणिक्कोत्त् पारु अम्मा। |
| वृत्तिः | - | अध्यापकः, सम्पादकः, हास्यसाहित्यकारः, साहित्यनिरूपकः। |
| प्रधानकृतयः | - | हास्याञ्जलिः, आद्योपहारः, सञ्जयन्(६ भागाः), साहित्यनिकषः। |
| मृत्युः | - | १९४३ सेप्तंबर् १३ |

## पदच्छेदः

| | | |
|---|---|---|
| केचिन्मन्यन्ते | - | केचित् + मन्यन्ते। |
| साहित्यविचारेणैव | - | साहित्यविचारेण + एव। |
| आसीदयम् | - | आसीत् + अयम्। |
| अतीवतत्परोऽयम् | - | आतीवतत्परः + अयम्। |

## विग्रहः

| | | |
|---|---|---|
| दुःखभूयिष्ठम् | - | अतिशयेन बहुः भूयिष्ठम् ,दुःखैः भूयिष्ठम्। |
| पुत्रकलत्रयोः | - | पुत्रः च कलत्रं च पुत्रकलत्रे, तयोः। |
| आत्मक्लेशम् | - | आत्मनः क्लेशः आत्मक्लेशः, तम्। |
| राजयक्ष्मणा | - | यक्ष्मणां राजा राजयक्ष्मा, तेन। |

# पठनप्रवर्तनानि



### साहित्यकाराणां तूलिकानामानि कोष्ठकात् विविच्य लिखतु।

**( कोविलन्, सञ्जयन्, विलासिनी, मालि, केसरी, उरूब्, सुमङ्गला )**

| | | |
|---|---|---|
| **उदा -** माणिक्कोत्त् रामुण्णि नायर् | - | **<u>सञ्जयन्।</u>** |
| पि. सि. कुट्टिकृष्णन् | - | ............................। |
| वेङ्ङयिल् कुञ्ञिरामन् नायनार् | - | ............................। |
| माधवन् नायर् | - | ............................। |
| एम्. के. मेनोन् | - | ............................। |
| वि. वि. अय्यप्पन् | - | ............................। |
| लीला नम्पूतिरिप्पाट् | - | ............................। |

**श्रद्धेयः अंशः**

चयनसामर्थ्यम्।



### पाठभागं पठित्वा सञ्जयस्य जीवनचरितं लिखतु।

श्रद्धेयौ अंशौ

आशयव्यक्तता , भाषाशुद्धिः।



## जीवनचरितरूपरेखां लिखतु ।

**जीवनचरितम् ।**

केरलीयहास्यसाहित्यकारेषु अन्यतमोऽस्ति ई. वि. कृष्णप्पिल्ला । अभिनेता, विमर्शकः, अभिभाषकः, सामाजिकः लेखकः इति वैविध्यपूर्णेषु मण्डलेषु स प्रसिद्धः अभवत् । सामाजिकविमर्शनावसरे 'त्रिलोकसञ्चारी' इति तूलिकाभिधा तेन स्वीकृता । सः कोल्लं जिल्लायां शास्तांकोट्टा देशे १८९४ सेप्तम्बर् मासस्य १४ तमे दिने अजायत । कुन्नत्तूर् पप्पु पिल्ला, इञ्चक्काट् वीट्टिल् कल्याणियम्मा च तस्य पितरौ । सीतालक्ष्मी, राजा केशवदासन्, इरविक्कुट्टि पिल्ला, रामराजाभिषेकम्, तिलोत्तमा इत्यादयः अस्य महाशयस्य प्रधानकृतयः भवन्ति । प्रसिद्धः हास्याभिनेता परेतः अटूर् भासिमहाशयः अस्य पुत्रोऽस्ति । १९३८ मार्च् ३० तमे दिने सः निर्यातोऽभवत् ।

**जीवनसूचिका**

| | | |
|---|---|---|
| नाम | - | ...................................... । |
| जननम् | - | ...................................... । |
| पितरौ | - | ...................................... । |
| प्रवर्त्तनमण्डलम् | - | ...................................... । |
| तूलिकानाम | - | ...................................... । |
| प्रधानकृतयः | - | ...................................... । |
| मृत्युः | - | ...................................... । |

**श्रद्धेयः अंशः**

आशयावगमनम् ।



## उदाहरणानुसारं संख्याः अक्षररूपेण लिखतु ।

| | | |
|---|---|---|
| **१९८४** | - | **चतुरशीत्यधिक एकोनविंशति शतम् । / चतुरशीत्यधिक नवशतोत्तरसहस्रम् ।** |
| १९४७ | - | ............................................. । |

१९५६ - ........................................... ।

२०१४ - ........................................... ।

२०२५ - ........................................... ।

**श्रद्धेयौ अंशौ**

संख्यायाः स्थानक्रमावबोधः ।

उचितरूपेण परिवर्तनम् ।

**प्रसिद्धानां केषाञ्चन साहित्यकाराणां चित्रं संयोज्य वीडियो/सम्पुटं रचयतु ।**

श्रद्धेयाः अंशाः

उचितानां चित्राणां स्वीकरणम् ।

लघुविवरणम् ।

क्रमीकरणौचित्यम् ।

## क्रियापदपरिचयः

**मन्यन्ते** - मन ज्ञाने आत्मनेपदी लट् प्र.पु.ब.व ।
मन्यते - मन्येते - मन्यन्ते ।

**अकरोत्**- डुकृञ् करणे उभयपदी परस्मैपदे लङ् प्र.पु.ए.व ।
अकरोत् - अकुरुताम् - अकुर्वन् ।

**निनाय** - णीञ् प्रापणे उभयपदी परस्मैपदे लिट् प्र.पु.ए.व ।
निनाय - निन्यतुः - निन्युः ।

**अहसत्** - हस् हसने परस्मैपदी लङ् प्र.पु.ए.व ।
अहसत् - अहसताम् - अहसन् ।

**निरगात्** - निर् उपसर्गपूर्वक इण् गतौ परस्मैपदी लुङ् प्र.पु.ए.व ।
निरगात् - निरगाताम् - निरगुः ।

साहित्यग्रन्थेभ्यः चलचित्रनाटकादिभ्यश्च आकर्षणीयाः हास्यकणिकाः सम्पाद्य संस्कृतभाषया विलिख्य कक्षायां प्रदर्शयतु ।

# शब्दकोशः

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अनवद्यम् | निर्दोषम् | കുറ്റമറ്റത് | ದೋಷರಹಿತ | Flawless |
| अरविन्दम् | कमलम् | താമര | ಕಮಲ | The lotus |
| अट्टः | निरीक्षणालयः | കാവൽമാടം | ಕಾವಲುಗೋಪುರ | Watchtower |
| कलत्रम् | पत्नी | ഭാര്യ | ಹೆಂಡತಿ | Wife |
| काञ्चनम् | सुवर्णम् | സ്വർണ്ണം | ಚಿನ್ನ | Gold |
| गर्दभः | खरः | കഴുത | ಕತ್ತೆ | Donkey |
| तदीयः | तस्य अयम् | അവന്റെത് | ಅವನ | His |
| नक्षत्रनाथः | चन्द्रः | ചന്ദ്രൻ | ಚಂದ್ರ | The moon |
| निमग्नः | निष्णातः | മുഴുകിയവൻ | ಮುಳುಗಿದವ | Immersed |
| पतिंवरा | स्वयंवरसन्नद्धा | വധു | ವಧು | Bride |
| प्रख्यातः | प्रसिद्धः | പ്രസിദ്ധൻ | ಪ್ರಸಿದ್ಧ | Famous |
| रजकः | वस्त्रप्रक्षालकः | വസ്ത്രംകഴുകുന്നവൻ | ಅಗಸ | The washer man |
| राजयक्ष्मा | क्षयरोगः | ക്ഷയരോഗം | ಕ್ಷಯರೋಗ | Tuberculosis |
| सहकारः | आम्रवृक्षः | തേൻ മാവ് | ಮಾವಿನ ಮರ | Mango tree |
| स्वसा | सोदरी | സഹോദരി | ಸಹೋದರಿ | Sister |
| सम्पादकः | संशोधकः | എഡിറ്റർ | ಸಂಪಾದಕ | Editor |